"परिकरः सहकारी स च व्याप्तिपक्षधर्मतादिः।"
इति सामान्यनिरुक्तौ जगदीशः॥
(अलङ्कारविशेषः। यथा, साहित्यदर्पणे।१०।७५।
"उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः॥"
उदाहरणं यथा तत्रैव। "अङ्गराज! सेनापते! द्रोणोपहासिन्! कर्ण! रक्षैनं भीमाद्दुःशासनम्॥")

परिकर्त्ता, [ ऋ ] पुं, ( परिकरोतीति। परि+कृ+तृच्।) अनूढ्ज्येष्ठे कनिष्ठविवाहस्य याजकः। इत्युद्वाहतत्त्वम्॥

परिकर्म्म, [ न् ] क्ली, ( परिक्रियते इति। परि+कृ+मनिन्।) कुङ्कुमादिना शरीरशोभाधानरूपसंस्कारः। इति भरतः॥ स्नानोद्वर्त्तनादि। इति स्वामी॥ शरीरसंस्कारमात्रम्। इत्यन्ये॥ तत्पर्य्यायः। अङ्गसंस्कारः २। इत्यमरः।२।६।१२१॥ प्रतिकर्म्म ३। इति शब्दरत्नावली॥ ( यथा कुमारे।४।१६।
"विबुधैरसि यस्य दारुणै-
रसमाप्ते परिकर्म्मणि स्मृतः।
तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे॥")

परिकर्म्मा, [ न् ] पुं, ( परितः कर्म्म यस्य।) परिचारकः। सेवकः। इति रत्नमाला॥

परिकर्म्मी, [ न् ] त्रि, ( परिकर्म्म विद्यतेऽस्य। परिकर्म्म+इनिः।) परिकर्म्मा। इति हेमचन्द्रः॥

परिकाङ्क्षितः, त्रि, ( परित्यक्तं काङ्क्षितं अभिलाषो येन।) तपस्वी। इति शब्दरत्नावली॥

परिकूटं, क्ली, ( परि सर्व्वतो भूषितं कूटम्।) पुरद्वारकूटकम्। तत्पर्य्यायः। हस्तिनखः २ नगरद्वारकूटकम् ३। इति हेमचन्द्रः॥

परिक्रमः, पुं, ( परिक्रमणम्। क्रमु पादविक्षेपे+भावे घञ्। "नोदात्तोपदेशस्येति।" ७।३।३४। इति उपधाया न वृद्धिः।) क्रीडार्थं पद्भ्यां गमनम्। तत्पर्य्यायः। विहारः २। इत्यमरः।३।२।१६॥ प्रदक्षिणम्। यथा,—
वराह उवाच।
"शृणु भद्रे! महापुण्यं पृथिव्यां सर्व्वतो दिशम्।
परिक्रम्य यथाख्यातं प्रमाणगणितं शुभम्॥
भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च॥
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले।
गणितानि समस्तानि वायुना जगदायुषा॥
ब्रह्मणा लोमशेनैव नारदेन ध्रुवेण च।
जाम्बवता सपुत्त्रेण रावणेन हनूमता॥
एतैरनेकधा देवैः ससागरवना मही।
क्रमिता बालिना चैव वाह्यमण्डलरेखया॥
अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना।
तथा च पूर्व्वदेवेन्द्रैः पञ्चभिः पाण्डुनन्दनैः॥
योगसिद्धैस्तथा कैश्चिन्मार्कण्डेयसुखैरपि।
क्रमिता न क्रमिष्यन्ति न पूर्व्वं नापरे जनाः॥
अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः।
मनसापि न शक्यन्ते गमनस्य च का कथा॥
सप्तद्वीपे तु तीर्थानि भ्रमणाद् यत् फलं भवेत्।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे॥
मथुरां समनुप्राप्य यस्तु कुर्य्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः।
कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा॥"
इति वराहपुराणम्॥

परिक्रमसहः, पुं, ( परिक्रमं विहारं सहते इति। सह+पचाद्यच्।) छागलः। इति त्रिकाण्डशेषः॥

परिक्रिया, स्त्री, (परिकरणम्। परि+कृ+शः। "रिङ् शयग्लिङ्क्षु।" ७।४।२८। इति रिङ्।) परिखाजलादिना वेष्टनम्। तत्पर्य्यायः। परिसर्पः २। इत्यमरः।३।२।२०॥ ( एकाहयागविशेषः। यदुक्तं आश्वलायनश्रौते।६।५।१२। "सद्यस्क्रिया अनुक्रिया परिक्रिया वा स्वर्गकामः॥" "परिक्रियायामेकाहा भवति एषामन्यतमेन स्वर्गकामो यजेत॥" इति नारायणः॥)

परिक्षित्, पुं, ( परि सर्व्वतोभावेन क्षीयते क्षयते दुरितं येन। परि+क्षि+क्विप्। कलिशासनकर्त्तृत्वादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। तथा चोक्तं महाभारते।१०।१६।२—३॥
"विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वनः।
उपप्लव्ये गतां दृष्ट्वा व्रतवान् ब्राह्मणोऽब्रवीत्॥
परिक्षीणेषु कुरुषु पुत्त्रस्तव भविष्यति।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति॥")
अभिमन्युपुत्त्रः। तत्पर्य्यायः। परीक्षित् २ पारिक्षितः ३ परिक्षितः ४। इति शब्दरत्नावली॥ (अयं युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। कुरुक्षेत्रयुद्धे परिक्षीणे कुरुकुले अभिमन्युपत्न्या उत्तराया गर्भाज्जातः। अयमेव गर्भस्थः क्रुद्धाश्वत्थामप्रयुक्तेन ब्रह्मास्त्रेण निहतोऽपि पुनर्भगवतः कृष्णस्य प्रभावात् जीवितं लब्धवान्। अयमेव वृषरूपिणं धर्म्मं निग्रहन्तं कलिं शशास। ततो गच्छति काले एकदाऽसौ मृगयां विहरन् क्षुधात्तृट्पीडितः मौनव्रतावलम्बिनः शमीकस्य मुनेराश्रमं गत्वा प्रत्युत्तरदानपराङ्मुखस्य तस्य स्कन्धे धनुष्कोट्या मृतं सर्पमासञ्जयामास। अनेनापराधेनेमं राजानं शमीकस्य पुत्त्रः शृङ्गी नामा तपस्वी इतः सप्तमेऽहनि तक्षकदंशेनायं मृतो भविष्यतीत्यभिशशाप। एतदाकर्ण्यायं गङ्गातीरे मुनिप्रभृतिभिरीश्वरनामकीर्त्तनादिकमालोचयन् प्रायोपवेशने स्थितस्तक्षकदष्टो मृतश्च। इत्येतत्कथा महाभारते विस्तरतो द्रष्टव्या॥) ( कुरुपुत्त्रविशेषः। यथा, हरिवंशे।३२।६०।
"कुरोस्तु पुत्त्राश्चत्वारः सुधन्वा सुधनुस्तथा।
परिक्षित्तु महाबाहुः प्रवरश्चारिमेजयः॥"
अविक्षित्-पुत्त्रः। यथा, महाभारते।१।६४।५०।
"अविक्षितः परिक्षित्तु शवलाश्वश्च वीर्य्यवान्॥")

परिक्षिप्तं, त्रि, ( परितः क्षिप्यते स्म इति। क्षिप्+क्तः।) परिखादिना वेष्टितम्। तत्पर्य्यायः। निवृतम् २। इत्यमरः।३।१।८८॥ सर्व्वतोभावेन क्षेपयुक्तञ्च॥

परिखा, स्त्री, ( परितः खन्यते इति। खन्+"अन्येष्वपि दृश्यते।" ३।२।१०१। डः।) राजधान्यादिवेष्टनखातम्। इति भरतः॥ गड़खाइ इति खाना इति च यस्याः प्रसिद्धिः। तत्पर्य्यायः॥ खेयम्। इत्यमरः।१।१०।२६॥ ( यथा, मनुः।७।१९६।
"भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥")
तस्या मानं यथा,—
"प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम्।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम्॥"
सङ्केतपूर्ब्बकञ्चैव परिखाद्वारमीप्सितम्।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे२०२ अध्यायः॥

परिख्यातः, त्रि, परिसर्व्वतोभावेन ख्यातः प्रथितः। इति परिपूर्ब्बख्याधातोः कर्त्तरि क्तप्रत्ययनिष्पन्नः॥ विख्यातः॥

परिगणितः, त्रि, ( परिसर्व्वतोभावेन गण्यते स्म। परि+गण+क्तः।) सर्व्वतोभावेन गणनायुक्तः। यथा। "परिगणितव्यतिरिक्तेषु संसर्गत्वविशेषो नादरणीयः परिगणनानर्थक्यात्।" इति जीमूतवाहनः॥

परिगतः, त्रि, ( परि+गम्+क्तः।) प्राप्तः। विस्मृतः। ज्ञातः। चेष्टितः। इति मेदिनी॥ गतः। इति हेमचन्द्रः॥ वेष्टितः। यथा,—
"अथ सवल्कदुकूलकुथादिभिः
परिगतोज्ज्वलदुद्धतबालधिः।"
इति भट्टिकाव्ये।१०।१॥

परिगृह्या, स्त्री, ( परि सर्व्वतोभावेन गृह्यते या परि+ग्रह+कर्म्मणि क्यप्।) नारी। इति शब्दचन्द्रिका॥

परिग्रहः, पुं, ( परिग्रहणमिति। परि+ग्रह+"ग्रहवृदृनिश्चिगमश्च।" ३।३।५८। इति अप्।) प्रतिग्रहः। (यथा, पञ्चतन्त्रे।४।७।
"कण्ठाश्लेषपरिग्रहे शिथिलता यन्नादराच्चुम्बसे
तत्ते धूर्त्त! हृदि स्थिता प्रियतमा काचिन्ममेवापरा॥")
सैन्यपश्चाद्भागः। पत्नी। भार्य्या। ( यथा, रघुः।९।१४।
"समनुकम्प्य सपत्नपरिग्रहा-
ननलकानलकानवमां पुरीम्॥")
परिजनः। परिवारः। आदानम्। ( यथा, रघुः।९।४६।
"अनुभवन्नवदोलमृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया।
अनयदासनरज्जुपरिग्रहे
भुजलतां जलतामबलाजनः॥")
स्वीकारः। ( यथा, रघुः।१८।३८